दैनिकं ई-संस्कृतवार्तापत्रम्

# हिमसंस्कृतवार्ताः

पञ्चाङ्गम्
अद्य सिद्धार्थी वि.सं. २०८२,
कलियुगाब्धः ५१२७ शरद-ऋतुः
सूर्यः दक्षिणायनम् मार्गशीर्षकृष्णचतुर्थी
कार्तिक २३ प्रविष्टांशः मङ्गलमयः भवेत्

■ पृष्ठ-5 ■ वर्ष-5 ■ अङ्क-18 | 1 | नवम्बर, 09 2025 | Website- www.himsanskritam.com | Email-himsanskrit@gmail.com


2 संस्कृतभारत्याः अखिलभारतीयम् अधिवेशनं कोयम्बतूरे समारब्धम्

3 धर्मशालायां भाषा-संस्कृतिविभागेन आयोजितः पहाड़ीदिवसः, विद्यालयानां छात्राः प्रतियोगितासु भागं ग्रहीतवन्तः

5 इङ्ग्लैण्ड्देशस्य एकः दम्पती १९२० एवं १९२८ तमवर्षयोः च जन्म प्राप्य स्वजनानाम् जन्मप्रमाणपत्रं शिमलानगरनिगमात् प्राप्तवान्

## सुभाषितम्

यतः सत्यं यतो धर्मो,
यतो ह्रीरार्जवं यतः।
ततो भवति गोविन्दो,
यतः कृष्णः ततो जयः।।

अर्थात्:- जहां सत्य, धर्म, लज्जा और सरलता है वहीं भगवान श्रीकृष्ण रहते हैं और जहां भगवान श्रीकृष्ण हैं वहीं विजयश्री है।

## सर्वोच्चन्यायालये विधि-सहायता-वितरण-तन्त्रस्य सुदृढीकरणविषये राष्ट्रिय सम्मेलनम् उद्घाटितवान् प्रधानमन्त्री नरेन्द्रमोदी




**हिमसंस्कृतवार्ताः** - प्रधानमन्त्री नरेन्द्रमोदी नवदेहल्यां सर्वोच्चन्यायालये विधि-सहायता-वितरण-तन्त्रस्य सुदृढीकरणविषये राष्ट्रिय सम्मेलनम् उद्घाटितवान्। सः नालसा इत्यस्य समुदायिक-मध्यस्थता-प्रशिक्षण-माड्यूल् इत्यस्य अपि उद्घाटनं कृतवान्, तेनोक्तं यत् सामाजिक न्यायः तदा एव सम्भवः यदा सर्वेभ्यः न्यायः प्राप्यते तथा च विधि-अभिलेखाः स्थानीयभाषासु उपलभ्यन्ते

## प्रधानमन्त्री नरेन्द्रमोदी बनारस्-रेलस्थानकात् चतुर्णां नूतनानां वंदेभारत्-एक्स्प्रेस्-रेलयानानां हरितध्वजं प्रदर्शितवान्



**हिमसंस्कृतवार्ताः** - प्रधानमन्त्री नरेन्द्रमोदी बनारस-रेलस्थानकात् चतुर्णां नूतनानां वंदेभारत्-एक्स्प्रेस्-रेलयानानां हरितध्वजं प्रदर्शितवान्। अस्मिन् अवसरे सः अवदत् यत् वंदेभारत्, नमोभारत्, अमृतभारत् इत्यादीनि रेलयानानि भारतीय रेल्-इत्यस्य आगामिकालस्य आधारः अभवत्। बनारस-खजुराहो, लखनऊ-सहारनपुर, फिरोजपुर-दिल्ली तथा एर्णाकुलम्-बेङ्गळूरु इति चतुर्णां नूतनानां वंदेभारत् रेलयानानां उद्घाटनेन देशे प्रचलितानां वंदेभारत् रेलयानानां सङ्ख्या षष्ठ्योत्तरैक शततोप्यधिका जाता। प्रधानमन्त्री अवदत् यत् विश्वस्य विकसितेषु देशेषु आधारभूतसंरचनाः तेषां आर्थिकवृद्धौ महत्त्वपूर्णां भूमिकां निर्वहन्ति

## बिहार-विधानसभा निर्वाचनस्यान्तिमचरणस्य निर्वाचनप्रचारः इतोपि तीव्रम् अभवत्, शीर्ष-नेतारः मतदातृन् प्रार्थयन्ति





**हिमसंस्कृतवार्ताः** - बिहार-विधानसभा-निर्वाचनस्य अन्तिम चरणस्य निर्वाचन प्रचारः इतोपि तीव्रम् अभवत्, शीर्ष-नेतारः अन्तिमसमये मतदातृन् प्रार्थयन्ति। प्रधानमन्त्री नरेन्द्रमोदी सीतामढी-बेतिया-नगरयोः जनसभां सम्बोधयन् अवदत् यत् एन्. डी. ए. बिहारस्य परम्परायाः विकासस्य संरक्षणाय च केन्द्रितः अस्ति। मुख्यमन्त्री नितीशकुमारः पञ्चोत्तर-द्विसहस्रतम वर्षात् आरभ्य शिक्षायाः स्वास्थ्यस्य च उन्नत्यैः अवधानं दत्तवान्, तत्रैव वी. आई. पी. प्रमुखः मुकेश सहनी इत्येषः अवदत् यत् यूनः परिवर्तनम् इच्छन्ति। जन-सुराज दलस्य संस्थापकः प्रशान्त किशोरः वृत्यवसराणां, समवायानां च अभावे एन. डी. ए. दलस्य आलोचनाम् अकरोत्। पूर्णिया-नगरे गृहमन्त्री अमितशाहः, आर्. जे. डी. तथा काङ्ग्रेस्-दले मतदातृन् भ्रामयन्ति इति आरोपितवान्, तेनोक्तं यत् बिहार्-राज्यं पुनः अपराधस्य अन्धकारस्य च युगं न प्रत्यागमिष्यति। कटिहार-नगरे काङ्ग्रेस्-नेत्री प्रियङ्का गान्धी अवदत् यत् महाघटबन्धनं सर्वेभ्यः वर्गेभ्यः समान-प्रतिनिधित्वाय प्रतिबद्धः अस्ति तथा च सर्वसमावेशी-विकासाय जाति-आधारित-जनगणनायाः समर्थनम् अपि करोति।


दैनिकं ई-संस्कृतवार्तापत्रम्
हिमसंस्कृतवार्ताः
हिमसंस्कृतवार्तापत्रस्य एकवर्षस्य सदस्यता
१०० ₹
One year subscription to the daily Sanskrit newspaper is Only 100 Rupees
To subscribe, text us a message saying hello on the number below.
7876636263



सूचना- हिमसंस्कृतवार्ताः दैनिकपत्रे व्याकरणात्मक-अशुध्दीनां कृते, राजनैतिक-सांस्कृतिकविचाराणाञ्च कृते सम्बद्धाः पत्रकाराः लेखकाश्च उत्तरदायिनः भविष्यन्ति

कार्यालयः
हिमसंस्कृतम्, प्रकाशनम्
जसवां कोटला तहसीलपरिसरस्य सम्मुखे
कस्बा कोटला जिला कांगड़ा हि.प्र.
पत्रव्यवाहरसङ्केतः-१७७१११
सङ्केतः- प्रबन्धनिदेशिका- शिवानी शर्मा हिमसंस्कृतम्


## राष्ट्रपतिः द्रौपदी मुर्मुः दिसम्बर-प्रथमदिनाङ्कात् ऊनविंशति दिसम्बर-पर्यन्तं संसदः शीतकालीन सत्रं आयोजनाय सर्वकारस्य प्रस्तावं स्वीकृतवती - किरेन रिजिजूः

**हिमसंस्कृतवार्ताः** - संसदीयकार्याणां मन्त्री किरेन रिजिजूः अद्य सूचितवान् यत् राष्ट्रपतिः द्रौपदी मुर्मुः दिसम्बर्-प्रथमदिनाङ्कात् ऊनविंशति दिसम्बर्-पर्यन्तं संसदः शीतकालीन सत्रं आयोजनाय सर्वकारस्य प्रस्तावं स्वीकृतवती । सामाजिकान्तर्जालीये सन्देशे श्रीरिजिजुः अवदत् यत् सर्वकारः एकं रचनात्मकं अर्थपूर्णं च सत्रस्य कल्पानां करोति यत् लोकतन्त्रं सुदृढं करोति, देशवासिनां आकांक्षाः पूरयति।

## वित्तमन्त्री-निर्मला सीतारामन द्वारा केन्द्रीकृतस्य राज्यस्य प्रथम विश्वविद्यालयस्य शिलान्यासं कृतम्



वित्तमन्त्री-निर्मला सीतारामन इत्यनया असम-राज्यस्य विश्वनाथ-जनपदस्य भोलागुरी-स्थले "स्वाहिद्-कनक-लता-बरुआ-राज्य-विश्वविद्यालयः" इति प्रौद्योगिक-व्यावसायिक-शिक्षायाः क्षेत्रे केन्द्रीकृतस्य राज्यस्य प्रथम विश्वविद्यालयस्य शिलान्यासं कृतम् । विश्वविद्यालयः आधुनिक-प्रौद्योगिकीषु पाठ्यक्रमं प्रदास्यति। परिसरः एकचत्वारिंशत्यधिक-द्विशतं यावत् एकड़मिते क्षेत्रे विस्तृतः भविष्यति। अस्मिन् अवसरे मुख्यमन्त्री हेमन्ता-बिस्वा सरमा अपि उपस्थितः आसीत्।

## राष्ट्रपतिः द्रौपदी मुर्मूः अंगोला-बोत्सवाना-देशयोः राजकीययात्रायां वर्तते

**हिमसंस्कृतवार्ताः** - राष्ट्रपतिः द्रौपदी मुर्मूः अंगोला-बोत्सवाना-देशयोः राजकीययात्रायां वर्तते। सा रात्रौ अंगोला-देशं प्राप्तवती। एषा यात्रा एतौ आफ्रिकादेशौ प्रति कस्यापि भारतीयराष्ट्रप्रमुखस्य प्रथमा यात्रा अस्ति। नवम्बर-मासस्य त्रयोदशदिनाङ्कपर्यन्तं प्रवर्तमानायां अस्यां यात्रायां विद्यमानद्वैपाक्षिकसम्बन्धानां समीक्षा, नूतनेषु क्षेत्रेषु सहकारस्य सम्भावनानां च अन्वेषणम् अपि भविष्यति। चीता-परियोजनायां बोत्सवाना-देशेन सह सहकारस्य प्रगतिः अपि कार्यसूच्याम् अन्तर्भवति।



# संस्कृतभारत्याः अखिलभारतीयम् अधिवेशनं कोयम्बत्तूरे समारब्धम्




**हिमसंस्कृतवार्ताः।** कोयम्बत्तूरे शुक्रवासरात् प्रारभ्यमाणं द्विसहस्रपञ्चविंशतितमकृष्टाब्दीयम् अखिलभारतीयम् अधिवेशनं भारतस्य आत्मनः आस्थायाः आचारस्य च अद्वितीयसङ्गमः सञ्जायते। एषः तादृशः महाकुम्भो यत्र संस्कृतवाणी गुञ्जति भारतस्य शाश्वतसंस्कारश्च प्रतीयते। संस्कृतभारत्या आयोजितमिदं त्रिदिवसीयम् अधिवेशनं नवम्बरमासस्य सप्तदिनाङ्कात् नवदिनाङ्कपर्यन्तं कोयम्बत्तूरपुरस्य एट्टिमडईस्थित-अमृताविश्वविद्यापीठमे भव्यरूपेण समारब्धम्। अस्मिन् अधिवेशने समग्रदेशात् संस्कृतानुरागिणः विद्वांसः शिक्षाविदः संस्कृतिसंरक्षकाश्च भागं गृह्णन्ति। अस्मिन् उद्घाटनसत्रे अविनाशिक्षेत्रस्य तिरुप्पुक्कोजियूर-आधीनस्य कामाक्षिदासस्वामी मातामृतानन्दमयीमठस्य तपस्यामृतानन्दपुरीस्वामी राष्ट्रियस्वयंसेवकसङ्घस्य सरकार्यवाहः होसबलेदत्तात्रेयश्च आशीर्वचनानि प्राददुः। संस्कृतभारत्याः अखिलभारतीय-अध्यक्षः प्रो॰मिश्रगोपबन्धुः अस्य अध्यक्षताम् अकरोत्। तत्र विशिष्टातिथिरूपेण मद्राससंस्कृतमहाविद्यालयस्य डो॰द्रविडशास्त्रिमणिः भाग्यनगरस्थभारतीयप्रौद्योगिकीसंस्थानस्य निदेशकः प्रो॰बी॰एस्॰मूर्तिश्च उपस्थितौ आस्ताम्। अखिलभारतीयमहामन्त्रिणा भट्टसत्यनारायणेन प्रास्ताविकम् उद्बोधनं प्रदत्तम्।अवसरेऽस्मिन् भारतीयज्ञानपरम्पराम् आश्रिता एका प्रदर्शनी अपि नवम्बरमासस्य षड्दिनाङ्कात् नवदिनाङ्कपर्यन्तम् आयोजिता वर्तते यस्यां वेद-उपनिषद्-आयुर्वेद-गणित-वास्तु-नाट्यशास्त्रसदृशानां विधानां दर्शनं भविष्यति। अधिवेशने संस्कृतशिक्षणस्य नवीनाः पद्धतयः आधुनिकतन्त्रज्ञानेन सह समन्वयः युवसु भाषां प्रति आकर्षणं तथा च वेदतः विज्ञानपर्यन्तम् संस्कृतेश्च समरसतापर्यन्तम् इत्याख्येषु विषयेषु विशेषज्ञसत्राणि भविष्यन्ति। सांस्कृतिकसन्ध्यासु वैदिकनृत्य-सङ्गीत-नाट्यरूपान्तरणैः भारतीयजीवनमूल्यानां प्रदर्शनं क्रियते।कानपुरप्रान्तस्य कार्यकर्तॄणां दायित्वेषु केचन परिवर्तनाः कृताः यत्र डो॰त्रिवेदीरत्नेशः कानपुरप्रान्तस्य प्रान्तमन्त्रिरूपेण घोषितः अभवत्। संस्कृतभारत्याः इदम् अधिवेशनं भारतीयसंस्कृतेः मूलैः सह पुनः सम्बन्धनस्य एकः प्रयासः अस्ति यो भारतस्य गौरवान्वितां परम्परां ज्ञानं वैदिकचिन्तनं च आधुनिकयुगचेतनया सह योजयितुं सन्देशं ददाति। अयम् उत्सवः न केवलं भाषागौरवस्य समारोहः अपितु संस्कृति-संस्कार-राष्ट्रीयास्मितायाश्च पुनरुत्थानस्य प्रतीकः अपि सञ्जातः।अस्मिन् अखिलभारतीये अधिवेशने केन्द्रीयसंस्कृतविश्वविद्यालयस्य कुलपतयः प्रो॰श्रीनिवासवरखेडी संस्कृतभारत्याः अखिलभारतीय-अध्यक्षः प्रो॰रमेशकुमारपाण्डेयः महर्षिपाणिनिवैदिकसंस्कृतविश्वविद्यालयस्य कुलपतिः प्रो॰शिवशङ्करमिश्रः काशीविद्वत्परिषदः अखिलभारतीयमहामन्त्री संस्कृतभारत्याः काशीप्रान्तस्य अध्यक्षश्च प्रो॰रामनारायणद्विवेदी, मण्डलाधिकारी त्रिपाठीचन्द्रभूषणः प्रो॰कृष्णकान्तशर्माणः आचार्यत्रिपाठीचन्द्रप्रकाशः कानपुरप्रान्तस्य प्रान्तमन्त्री डा॰रत्नेशत्रिवेदी डा॰सर्वेशकुमारशाण्डिल्यः डा॰श्यामसुन्दरः मनीषदीक्षित इत्यादयः अन्ये च विद्वांसः उपस्थिताः आसन्।

# शोकसन्देशः

## पण्डितविष्णुकान्त-शुक्लः यशःशेषः संवृत्तः



**(ऋषिराजपाठकः)** अयमतिशोकप्रसारको वृत्तान्तो यद् पण्डितविष्णुकान्तशुक्लः अस्यैव वर्षस्य अक्टूबरस्य षोडशे दिनाङ्के दिवमगच्छत्। विद्यावाचस्पतिः पण्डितविष्णुकान्तशुक्लः दिल्ल्यां सहारनपुरे च मस्तिष्कव्रणरोगेण सङ्घर्षरतः चिकित्सया सेवमानः उक्तदिनाङ्के अपराह्ने प्राणानत्यजत्। असौ पद्मश्रीसम्मानितस्य आचार्यरमाकान्तशुक्लस्य अनुज आसीत्। पण्डितविष्णुकान्तशुक्लः खुर्जायाम् आचार्यब्रह्मानन्दशुक्लात् श्रीमत्यां प्रियंवदादेव्यां 29.10.1942 तमे दिनाङ्के जनिमलभत। असौ संस्कृत-हिन्दी-अपभ्रंशभाषाणां तत्साहित्यानां च आधिकारिको विद्वान् आसीत्। असौ आयुर्वेदशास्त्रेऽपि कृतभूरिपरिश्रमोऽवर्तत। अमुना सहारनपुरस्य जे.वी.जैनमहाविद्यालये हिन्दीविभागे आचार्यत्वमाध्यक्ष्यं च निर्व्यूढम्। अस्य अन्त्येष्टिसंस्कारः सहारनपुरे 17.10.2025 तमे दिनाङ्के त्रयोदशाहश्च 29.10.2025 तमे दिनाङ्के सम्पन्नतां गतः। नवयौवनदिग्दर्शन, श्रीकृष्णनामकोशः,नीतिसूक्तं आदिग्रन्थानां लेखकः, कविः, वैदिकगणस्य श्लोकशल्यचिकित्साविभागाध्यक्षः, श्रीमद्भागवतमहापुराणकथाव्यासश्च पण्डितविष्णुकान्तशुक्लः अस्मान् विहाय दिवं गत इति संस्कृतसंवादपक्षतः, देववाणीपरिषत्पक्षतः, सकलसंस्कृतविद्वत्कविलोकपक्षतश्च तस्मै श्रद्धाञ्जलयः।

# अखिलभारतीयविद्वत्परिषदः रजतजयन्ती समारोहे सम्मानितः प्रो. केशवशर्मा







हिमसंस्कृतवार्ताः। अखिलभारतीयविद्वतपरिषदः रजतजयन्तीमहोत्सवः आयोजितः। कार्यक्रमस्य शुभारम्भः गतदिने नवम्बरमासस्य अष्टमे दिनाङ्के अभवत् यत्र जगतगुरशंकराचार्यः हेमानन्दगिरिजी (नेपाल), स्वामीहरिप्रियःदासजीमहाराजः वृन्दावनम्, प्रो.केशवरामशर्मा, हिमाचलम्, प्रो.पी.एन,सिंहः निदेशकः आई.यू.सी.टी.ई प्रमुखरूपेण उपस्थिताः। कार्यक्रमे राष्ट्रपतिसम्मानितः महामहोपाध्यायः पण्डितराजः प्रो.केशवशर्मा अभिनवकालिदासः विशेषः सम्मानेन सम्मानितः। हिमाचलप्रदेशस्य हिमसंस्कृतवार्ताः प्रधानसम्पादकेन डॉ.अमनदीपशर्मणा प्रसन्नता प्रकटयन् उक्तं यत् महामहोपाध्यायः केशवशर्मा हिमाचलप्रदेशस्य गौरवमस्ति, यः अस्माकं सर्वदाप्रेरणास्रोतः अस्ति। कार्यक्रमोऽयं द्विदिवसीयः भविष्यति यत्र नवमे दिनाङ्के माननीयराज्यपालः आरिफमोहम्मदखानः बिहारप्रान्तः, माननीय डॉ.महेन्द्रनाथपाण्डेयः, पूर्वकेन्द्रीयमन्त्री भारतसर्वकारः मुख्यातिथित्वेन उपस्थिताः भविष्यन्ति

# धर्मशालायां भाषा-संस्कृतिविभागेन आयोजितः पहाड़ीदिवसः, विद्यालयानां छात्राः प्रतियोगितासु भागं ग्रहीतवन्तः




**हिमसंस्कृतवार्ताः।** हिमाचलस्य सांस्कृतिकधरोहरं तस्य उपभाषासु निहितम् अस्ति । तस्य रक्षणं प्रत्येकं हिमाचलवासिनं दायित्वम् अस्ति। एषा सांस्कृतिकनिधिः भविष्येऽपि नवयुवकेषु गच्छेत् एतदर्थं हिमाचलप्रदेशस्य भाषा-संस्कृतिविभागस्य प्रयत्नाः प्रंशनीयाः सन्ति। अस्मिन् क्रमे कांगड़ाजनपदः भाषा-संस्कृतिविभागेन पहाड़ी दिवस-2025 इत्यस्य अन्तर्गतं जिला स्तरीयविद्यालयबालप्रतियोगितानाम् आयोजनं आयोजन नवम्बरमासस्य सप्तमे दिनाङ्के पीएम. श्री.रा.व.मा.विद्यालयः धर्मशाला इत्यत्र आयोजितम् । कार्यक्रमेऽस्मिन् पहाड़ीभाषाणां प्रचारविषये भाषणप्रतियोगिता आयोजिता। मण्डलस्य पारम्परिकवस्त्र-आभूषण-उत्सवयोः विषये निबन्ध-प्रतियोगिता अपि आयोजिता आसीत् । हिमाचलस्य उपभाषासु अनेकानि स्थानीयलोकोक्तयः, प्रचलिताः उक्तयश्च च प्रयुक्तानि इति सर्वविदितं, तेषां प्रचारार्थं लेखनप्रतियोगितायाः आयोजनं कृतम् । कार्यक्रमस्य विषये सूचनां दत्त्वा जिलाभाषाधिकारी अमितगुलेरिया अवदत् यत् एतासु प्रतियोगितासु धर्मशालायाः समीपस्थाः विद्यालयाः आमन्त्रिताः आसन्, यत्र प्रायः २५ विद्यालयानां प्रतिभागिनः भागं गृहीतवन्तः। कार्यक्रमस्य उद्घाटनं धर्मशाला अनुमंडलाधिकारी मोहितरत्नः कृतवान्। छात्रान् सम्बोधयन् उपविभागीयः अधिकारी अवदत् यत्, "अस्माभिः अस्माकं स्थानीयभाषासु गर्वः कर्तव्यः।" सः जर्मनी इत्यादिषु देशेषु निवसतां स्वमित्राणाम् उदाहरणम् उद्धृतवान् यत् जर्मनीसदृशेषु देशेषु जनाः स्वभाषायां गर्वं कुर्वन्ति, येन तत्रत्यः पाठ्यक्रमः अपि तस्यामेव भाषायां विद्यते। भाषाविभागेन विद्यालयस्य प्राचार्या ममताठाकुरः सहकार्यकृते अपि सम्मानिता। विद्यालयप्रतियोगितासु निर्णायकरूपेण युगलकिशोरडोगरा, श्री अश्वनीदीवानः, अशोककुमारः च उपस्थिताः आसन्।

## प्रतियोगितायाः परिणामः

भाषासंस्कृतिविभागेन आयोजिताः प्रतियोगिताः सार्थकाः आसन्, यत्र छात्राः कांगड़ीभाषायाः वाक्प्रतियोगितासु, निबन्धप्रतियोगितासु, सुभाषितपहेलीलेखनप्रतियोगितासु च उत्साहेन भागं गृहीतवन्तः। एतासु स्पर्धासु भाषणप्रतियोगितायां दलजीतसिंहः वरिष्ठमाध्यमिकविद्यालयः सकोहः प्रथमस्थानं प्राप्तवान् । कोतवालीबाजारस्य वरिष्ठमाध्यमिकविद्यालयस्य रिद्धिमा द्वितीयस्थानं, दाड़ीनगरस्य वरिष्ठमाध्यमिकविद्यालयस्य रिद्धिमा तृतीयस्थानं प्राप्तवती। अंशिका, वरिष्ठ माध्यमिक विद्यालयः, खनियारा, निबंधलेखन-प्रतियोगितायां प्रथमस्थानं प्राप्तवती। वरिष्ठ-माध्यमिक-विद्यालयः, खनियाराखास इत्यस्य छात्रा आकांक्षा द्वितीयस्थानं, वरिष्ठमाध्यमिक-विद्यालयः, तंगरोटी इत्यस्य छात्रा अंकिता, तृतीयं स्थानं प्राप्तवती। वरिष्ठमाध्यमिकविद्यालयः, तंगरोटी रजनीशः, कांगडी सुभाषितासु प्रथमं स्थानं प्राप्तवान्। शासकीय-वरिष्ठ-माध्यमिक-विद्यालयः, जदराङ्गल द्वितीयस्थानं, शासकीय-वरिष्ठ-माध्यमिक-विद्यालयः, टंगनरवाना इत्यस्य छात्रा महकः तृतीयं स्थानं प्राप्तवती। कांगड़ी पहेलीलेखन-प्रतियोगितायां शासकीय-उच्च माध्यमिक-विद्यालय, कोतवाली बाजार इत्यस्य रिया प्रथमं स्थानं, शासकीयवरिष्ठमाध्यमिकविद्यालयः, जदराङ्गलः इत्यस्य प्रियङ्का द्वितीयस्थानं, शासकीय-वरिष्ठ-माध्यमिकविद्यालयः, दाड़ी इत्यस्य अक्षराकपूरः तृतीयं स्थानं प्राप्तवती।

## ब्रिस्बेन्-नगरस्य गाबायां भारत-आस्ट्रेलिया-देशयोः मध्ये भारतेन द्वे-एकम् अङ्काभ्यां श्रृङ्खला विजिता

क्रिकेट्-क्रीडायाम् ब्रिस्बेन्-नगरस्य गाबायां भारत-आस्ट्रेलिया-देशयोः मध्ये अन्तिमा विंशति प्रति विंशति क्रीडा वृष्ट्या बाधितः, येन भारतेन द्वे-एकं अङ्काभ्यां श्रृङ्खला विजिता। क्रीडायाः अवसानात् पूर्वं, भारतं द्विपञ्चाशत् धावनाङ्केषु आसीत्। यस्मिन् शुभमन् गिलः ऊनत्रिंशत् धावनाङ्केषु, अभिषेक शर्मा च त्रयोविंशति धावनाङ्केषु आसीत्।



## नगरीकरणं विकसितभारतस्य मार्गः अस्ति-मनोहरलाल खट्टरः



केन्द्रीय-आवासन-नगरकार्य-मन्त्रिण मनोहरलाल खट्टर-इत्यनेन शुक्रवासरे उक्तं यत् नगरीकरणं विकसितभारतस्य मार्गः अस्ति, एतत् नागरिककेन्द्रितं सर्वसमावेशीयं सुस्थिरं च भवेत् इति। नवदिल्ल्यां पञ्चविंशत्यधिकद्विसहस्रतमवर्षस्य राष्ट्रिय-नगर-सम्मेलनस्य उद्घाटनसत्रं सम्बोधयन् सः अवदत् यत् गतदशके नगरीय-निवेशः द्रुतगत्या वर्धमानः अस्ति, येन स्वच्छ-स्वस्थ-समृद्ध-नगराणां निर्माणाय सर्वकारस्य प्रयत्नाः अधोरेखिताः । मन्त्रिणा क्षमतावर्धनार्थं 'अमृतगानम्-जल् ही जीवनम्', समेत्य अनेकानि उपक्रमाणि प्रारब्धानि। सः 'अर्बन्-इन्वेस्ट्मेण्ट्-विण्डो' इत्यस्य अपि अनावरणं कृतवान्, यत् 'अर्बन्-इन्फ्रास्ट्रक्चर्-परियोजनासु निवेशं सुकरं कर्तुं' नूतनः मञ्चः अस्ति।

## उपराष्ट्रपतिना जैनपाण्डुलिपीनां संरक्षणार्थं भारतसर्वकारस्य 'ज्ञानभारतं' अभियानस्य प्रशंसा कृता




उपराष्ट्रपतिः सी.पी. राधाकृष्णन-इत्यनेन जैनपाण्डुलिपीनां संरक्षणार्थं भारतसर्वकारस्य 'ज्ञानभारतं' अभियानस्य प्रशंसा कृता। सः नवदिल्ल्यां आचार्य-हंसरत्न-सूरीश्वर-महाभागस्य अष्टमे अशीत्यधिकैकशतं उपवास-पारणासमारोहे भाषमाणः एतदुक्तवान्, प्राकृत-भाषायाः सः प्रशंसितवान्। वैश्विकमान्यतायै च जैनधर्मस्य शास्त्रीय-भाषारूपेण स्वीकृतिम् अपि भाषणकाले उपराष्ट्रपतिः शान्त्यै गूढयोगदानं प्रकाशितवान्। अस्मिन् अवसरे श्री राधाकृष्णन-वर्यः तमिलसाहित्ये संस्कृतौ च जैनधर्मस्य ऐतिहासिकप्रभावम् अपि उल्लेखितवान्।

## कुप्वाडा-जनपदस्य केरन्-सेक्टर्-इत्यत्र सुरक्षाबलैः सह जाते संघर्षे द्वौ बलात् प्रवेशरतौ जनौ मारितौ।

जम्मू-कश्मीर्-प्रदेशे गतरात्रौ कुप्वाडा-जनपदस्य केरन्-सेक्टर्- इत्यत्र सुरक्षाबलैः सह जाते संघर्षे द्वौ बलात् प्रवेशरतौ जनौ मारितौ। सेनायाः प्रवक्त्रानुसारं एल. ओ. सी. इत्यस्य अस्मिन् भागे अन्तः प्रविष्टुं प्रयतमानानां आतंकवादिनां समूहं सैनिकाः अवरोधितवन्तः। सः अवदत् यत्, यदा उभयोः मध्ये संघर्षः अभवत् तदा प्रचण्डः गोलिका प्रहारः अभवत् यस्मिन् द्वौ अज्ञातौ मारितौ।

# वन्देमातरम् गीतेन प्रतिध्वनितम् रामटेकम्



## स्वातन्त्र्यसङ्घर्षकाले राष्ट्रगीतस्य प्रेरणादायकशक्त्या राष्ट्रस्य सेवा विलक्षणा प्रेरणादायिका च अस्ति - प्रो हरेकृष्णः अगस्ती

हिमसंस्कृतवार्ताः - रामटेकम्। वन्देमातरम्-गीतस्य १५० तमे जन्मदिवसस्य अवसरे कविकुलगुरुकालिदाससंस्कृतविश्वविद्यालये रामटेक इत्यत्र राष्ट्रगीतस्य सामूहिकगायनं जातम्। कुलपतिः डॉ. अतुलवैद्यः, रामटेकपरिसरस्य निदेशकः प्रो हरेकृष्णः अगस्ती, कुलसचिवः डॉ. रोशन अलोने, अन्यः साविधिक अधिकारी, अधिष्ठाता, प्राध्यापकः, अधिकारिणः कर्मयोगिनः, छात्राः च सहभागिनः अभवन्। अस्य राष्ट्रगीतस्य समूहगायनेन सर्वेषां कृते देशभक्तेः वातावरणं निर्मितम् ।

रामटेक परिसरस्य निदेशकः प्रो. हरेकृष्णागस्तीः अवदत् यत्, "जनगणमनं राष्ट्रगीतं इव सर्वेषां कृते वंदेमातरम् राष्ट्रगीतं कण्ठस्थं कृत्वा गायितव्यम्" इति। एतेन आह्वानेन प्रो.अगस्ती बङ्किमचन्द्रचट्टोपाध्यायस्य योगदानस्य प्रशंसाम् अकरोत् । शब्दानां शक्तिः देशभक्तेः प्रबलं ज्वाला कथं प्रज्वलितुं शक्नोति इति एतत् गीतं सम्यक् उदाहरणम् अस्ति । स्वातन्त्र्यसङ्घर्षकाले भारतीयलेखककविभिः शब्दशक्त्या राष्ट्राय या सेवा कृता सा विलक्षणा प्रेरणादायिनी च अस्ति।

कुलसचिवः डॉ. रोशन अलोने इत्यनेन उक्तं यत् केन्द्रराज्यसर्वकारेभ्यः अस्य कार्यक्रमस्य बृहत्परिमाणेन आयोजनार्थं निर्देशाः प्राप्ताः। सः व्याख्यातवान् यत् आधुनिककालस्य छात्राणां कृते स्वतन्त्रतासङ्घर्षे योगदानं दत्तवन्तः स्वतन्त्रतासेनानिनः स्मरणार्थं देशे सर्वत्र विभिन्नस्तरयोः एषः कार्यक्रमः आयोजितः अस्ति।

कार्यक्रमस्य संचालनं डॉ. सचिन डावरे इत्यस्य नेतृत्वे, राष्ट्रियसेवा योजनायाः समन्वयक डॉ. जयवंत चौधरी इत्यस्य सुचारु योजनायाः अन्तर्गतम् अभवत्

# बिहारनिर्वाचनम्- प्रमोदकुमारस्य समर्थने प्रचारं कृतवान् उत्तरप्रदेशस्य मुख्यमन्त्री योगी




हिमसंस्कृतवार्ताः,कुणालकौशिकः बिहारम्। जनसभायां महान् जनसागरः समागतः — मुख्यमन्त्रिणा योगिना आदित्यनाथेन सह मञ्चे सार्वजनिकरूपेण प्रमोदकुमारः उक्तवान् — "जनताया आशीर्वादः मम जीवने अविस्मरणीयः भविष्यति"आयोजितायां भव्यायां जनसभायां माननीयः मुख्यमन्त्री श्रीयोगी आदित्यनाथः स्वभाषणे विकासस्य, सुशासनस्य, जनसेवां प्रति सर्वकारस्य निष्ठां पुनः उद्घोषितवान्।तस्मिन्नेव अवसरे प्रमोदकुमारः उपस्थितं विशालं जनसमूहं सम्मानितान्, कार्यकर्तॄन् प्रति कृतज्ञतां प्रकट्य उक्तवान्—अद्यतनायां जनसभायाम् उपस्थितं विशालं जनसमूहं च प्रति मम हृदयात् आभारः। यूयं यत् आशीर्वादं समर्थनं च दत्तवन्तः, तत् मम जीवने सर्वदा अविस्मरणीयं भविष्यति।"

सः अग्रे अवदत् यत् सर्वे जनाः EVM क्रमाङ्कद्वये कमलचिह्नस्य अग्रे स्थितं चिह्नं नोदनं कृत्वा विशालैः मतैः विजयं ददतु, यतः प्रदेशस्य सर्वाङ्गिणः विकासः निरन्तरं प्रवर्तेत।सभायां परमोत्साहः दृश्यताम्। कार्यकर्तॄणां जयघोषैः नारैश्च सम्पूर्णं प्राङ्गणं गुञ्जितम्। मुख्यमन्त्री च प्रमोदकुमारश्च जनान् प्रति आश्वासनं दत्तवन्तौ यत् आगामिकाले प्रदेशस्य च क्षेत्रस्य च विकासः नवम् अध्यायं प्रारभिष्यति।

# नवयुवकानां सशक्तीकरणे सञ्जयपाराशरस्य प्रयासाः सतत् रूपेण वर्धमानाः सन्ति




हिमसंस्कृतवार्ताः। हिमाचलप्रदेशे नवयुवकेषु वृत्तिहीनता विशालासमस्या अस्ति, युवकाः इदानीं वृत्यर्थं सर्वकारस्य मुखं पश्यन्ति। तेषाम् अध्ययनमपि वृत्यर्थं सहयोगी न अस्ति, तत्रैव सर्वकारस्य वनमित्र, पशुमित्र, रोगीमित्र सदृशाः वृत्तयः अपि आधुनिके युगे न पर्याप्ताः, तत्र नवयुवकानां जीवनं शोषणमेव प्रतीयते, यतोहि प्रतिमासं पञ्च-षड्सहस्ररुप्यकाणां वृत्तिः महार्घतायाः काले न पर्याप्ता। अस्मिन् काले एवं जसवां विधानसभाक्षेत्रे समाजसेविनः सञ्जनपाराशरस्य कार्याणि श्लाघनीयाः सन्ति। सञ्जयपाराशरः व्यापारिकजलपोतानां व्यवसाये अनुभवी व्यवसायी वर्तते। तेन विगतेषु पञ्चषड्वर्षेषु सहस्राणां हिमाचलीयानां नवयुवकानां कृते व्यापारिकजलपोतव्यवसाये वृत्तिः कारिता, यत्र नवयुवकाः प्रतिमासं लक्षात्मकं धनं प्राप्नुवन्ति, स्वप्नान् पूरयन्ति च, अस्मिन् एव क्रमे इदानीं तेन जसवां विधानसभायाः विविधेषु क्षेत्रेषु नवयुवकानां कृते धावनप्रतियोगितानां माध्यमेन, क्रीडाप्रतियोगितानां माध्यमेन शैक्षणिकव्यवसायात्मिकानि कौशलानि सम्वर्धयन्ते। एतासु प्रतियोगितासु लक्षरुप्यकाणां पारितोषिकानि नवयुवकेभ्यः प्रदास्यन्ते, तत्रैव वृत्यार्थम् नवयुवकानां सहयोगः क्रियते। सञ्जयपाराशरस्य प्रयासैः इदानीं सहस्राणां युवकानां जीवनं सफलं जातम्, सः तेषां कृते गरीबों का मसीहा इति उच्यते। प्रतियोगितानां क्रमे २८ नवम्बरदिनाङ्के जसवां प्रागपुरविधानसभायां मैराथनधावनप्रतियोगितायाः आयोजनमपि अस्मिन्नेव क्रमे आयोज्यते, यत्र शताधिकाः नवयुवकाः भागं ग्रहीष्यन्ति। सञ्जयपाराशरस्य कार्यालीयसदस्येन रविन्द्रशर्मा कार्यक्रमस्य विषये सूचयन्नोक्तं यत् एतादृशाः बहवः कार्यक्रमाः सञ्जयपाराशरद्वारा चिन्तिताः सन्ति, येन नवयुवकानां कृते सशक्तीकरणं भविष्यति।

# राज्यस्तरीयभाषणप्रतियोगितायां बडाईविद्यालयात् अंकिता द्वितीयस्थानं प्राप्तवती



हिमसंस्कृतवार्ताः। राज्यस्तरीयभाषण-प्रतियोगितायां बडाईविद्यालयात् अंकिता द्वितीयस्थानं प्राप्तवती। १४ वर्षाणाम् अधः बालिकानां कृते राज्यस्तरीयक्रीडाप्रतियोगिता हमीरपुरस्य नादौनगरस्य सर्वकारीय-वरिष्ठ-माध्यमिक-विद्यालये समाप्ता। एकलगीतप्रतियोगितायां काङ्गड़ामण्डलेन प्रथमस्थानं प्राप्तम्। काङ्गड़ामण्डलस्य अपि शासकीयमाध्यमिकविद्यालयस्य बडाइतः अंकिता भाषणप्रतियोगितायां द्वितीयस्थानं प्राप्तवती, येन काङ्गड़ामण्डलाय, नागरोटाबगवां खण्डाय च गौरवः प्राप्तः। अनेन सम्पूर्णे विद्यालये ग्रामे च आनन्दः प्राप्तः । अस्मिन् अवसरे स्थानीयविद्यालयस्य शिक्षकः दीपकुमारशास्त्री स्वस्य प्रसन्नतां प्रकटयन् राज्यस्तरं प्राप्तुं स्वतः एव महत्त्वपूर्णा उपलब्धिः इति अवदत्।



# अपौरुषेयो वेदः

सर्वे ग्रन्थाः मानवैः ग्रथिताः, अर्थात् प्रत्येकं ग्रन्थस्य प्रणेता कश्चन मनुष्यः प्राप्यते, परन्तु एकमात्रं वेदप्रणेता न कोऽपि मनुष्यः उपलभ्यते, अपितु परम्परया श्रूयमाणविषयोऽयम् । तस्माद् वेदस्य अपरं नाम श्रुतिः इति । यथा सनातनधर्मस्य प्रतिष्ठापकः स्वयं परमात्मा वर्तते, तथैव वेदस्य प्रणेता अपि स्वयं परमात्मा स्यात्, नात्र कोऽपि अन्य पुरुषः सम्भवति, तस्माद् वेदः अपौरुषेयः आख्यायते।

'सर्वं खल्विदं ब्रह्म' इत्यर्थात् निश्चयपूर्वकं हि एतत्सर्वं ब्रह्म वर्तते इति । भगवत्सृष्टितले सर्वान् समानान् विज्ञाय सर्वैः सह मर्यादापूर्वकं निक्षिप्ता समदृष्टिः नाम हि सर्वोपरि ज्ञानम्, संस्कृतेः उत्तमरूपं वा कथ्यते । एतस्य भावस्य संरक्षणार्थं हि वेदेषु नानासंस्काराः विहिताः सन्ति । एतदेव साम्यवादस्य सत्यस्वरूपमपि वर्तते । यजुर्वेदे एवमुक्तमस्ति -

"ओम् इषे त्वोर्जे त्वा, वायव स्थ, देवो वः सविता प्रार्पयतु, श्रेष्ठतमाय कर्मण आप्यायध्वम्, अघ्न्याऽ इन्द्राय भागं, प्रजावतीः अनमीवाऽअयक्ष्मा मा व स्तेनऽईशत माऽघशं₹सः ध्रुवा अस्मिन् गोपतौ स्यात्, बह्वीर्यजमानस्य पशून् पाहि ।" इति । आशयो यत् - 'हे परमेश्वरः ! अहं त्वां ब्रह्मतत्त्वार्थं, विवेकार्थं च प्रार्थये ; पर्याप्तवर्षार्थम्, अन्नार्थञ्च प्रार्थये ; सुप्रजार्थम्, अभ्युदयार्थञ्च प्रार्थये ; सत्वाधिकारार्थम्, उत्कृष्ट-सदाचारार्थञ्च त्वां प्रार्थये, यतोहि त्वं सर्वत्र गमनशीलः, सर्वेषां चिन्तकः चासि । सर्वेषाम् उत्पादक हे देव ! श्रेष्ठकर्मार्थं प्रेरय । इन्द्रस्य भागम् इन्द्रियाणि प्राप्नुयुः, कृषिहेत्वर्थं गवाम्, एवं सुखहेत्वर्थं ज्ञानस्य वर्धनं भवेत् । ईश्वरकृपया गावः, स्त्रियः, बुद्धयः, प्रजावतीः इत्येते क्षयादिरोगरहिताः भवन्तु, एतेषामुपरि चौराणां, दुष्टजनानां च अधिकारो मास्तु कदाचिदपि । हे परमेश्वर ! तव स्वामित्वे सर्वे प्राणिनः अचलाः, निर्भयाः, सुरक्षिताः च सन्तु ।"

अतो वेदो हि मनुष्यमात्रस्य कृते कश्चन महान् संस्कारप्रदः, सुसंस्कृतिप्रदः, विवेकप्रदः, जीवनस्य परम-पाथेयस्वरूपः मार्गदर्शकः, अपौरुषेयश्च ग्रन्थो वर्तते, यश्च सम्यक् अध्येतव्यः, ज्ञातव्यश्च इति, शुभम् ।

✍असमप्रदेशीयः विज्ञानशिक्षकः, नारदोपाध्यायः

# इङ्ग्लैण्ड्देशस्य एकः दम्पती १९२० एवं १९२८ तमवर्षयोः च
## जन्म प्राप्य स्वजनानाम् जन्मप्रमाणपत्रं शिमलानगरनिगमात् प्राप्तवान्



**हिमसंस्कृतवार्ताः - शिमला।** आङ्ग्लशासनकाले कदाचित् ग्रीष्मकालीनराजधानी शिमला अनेकाभिः ऐतिहासिकनिधिभिः पूरिता अस्ति। शिमलानगरनिगमस्य अद्यापि ब्रिटिशयुगस्य शतशः वर्षाणां अभिलेखाः सन्ति । एतान् अभिलेखान् प्राप्तुं इङ्ग्लैण्ड्देशस्य जनाः नगरनिगमस्य भ्रमणं निरन्तरं कुर्वन्ति । शुक्रवासरे इङ्ग्लैण्ड्देशस्य हर्टफोर्डशायर कांटीतः समागतः एकः दम्पत्ति शिमलानगरनिगमस्य स्वास्थ्यशाखातः स्वपरिचितानाम् जन्मप्रमाणपत्रं प्राप्तवान्।

समाचारानुसारं इङ्ग्लैण्ड्-देशस्य निवासिनः जार्ज लुकः, जार्ज मैथ्यू इंग्राम लुक-इत्येतौ शिमला-नगरं भ्रमितुम् आगतौ। तेषां निकटपरिचिताः शिमलायां जाताः इति ज्ञातवन्तः । अतः ते नगरनिगमस्य स्वास्थ्यशाखां गत्वा जन्मप्रमाणपत्रार्थं आवेदनं कृतवन्तः। जार्ज लुक् इत्यनेन उक्तं यत् तस्य परिचितस्य इयान कॉलिन, स्टुअर्ट नारमंड इत्यस्य जन्म शिमला-नगरे १९२८ तमे वर्षे फेब्रुवरी-मासस्य १८ दिनाङ्के अभवत् । जार्ज मेथ्यू इन्ग्राम-लॉक् इत्यनेन उक्तं यत् तस्य परिचितस्य मैरी एवलिन् इत्यस्याः जन्म १९२० तमे वर्षे मे-मासस्य ६ दिनाङ्के अभवत् । नगरनिगमस्य स्वास्थ्यशाखा उभयोः जन्मप्रमाणपत्रं निर्गतवती नगरनिगमस्य स्वास्थ्यपदाधिकारी डॉ. चेतनचौहानः अवदत् यत् इङ्ग्लैण्ड्देशात् आगतं दम्पत्योः परिचितेभ्यः जन्मप्रमाणपत्रं प्रदत्तम्।

### नगरनिगमस्य पार्श्वे १८७० तमस्य वर्षस्य अभिलेखाः सन्ति

नगरनिगमस्य कृते ब्रिटिशकालात् २०१५ पर्यन्तं जन्ममृत्योः अभिलेखाः सन्ति। अस्मिन् १८७० तः १९४७ पर्यन्तं शिमलानगरे निवसतां ब्रिटिशनिवासिनः अभिलेखाः सन्ति।

# हिमाचलप्रदेशे भवननिर्माणविनियमानाम् शिथिलीकरणम्
## संशोधितनियमानां प्रारूपः प्रकाशितः, ३० दिवसेषु आक्षेपाः याचिताः

**हिमसंस्कृतवार्ताः - शिमला।** हिमाचलसर्वकारेण सर्वासु योजनाक्षेत्रेषु भवननिर्माणविनियमानाम् शिथिलीकरणं कृतम् अस्ति । राज्यमन्त्रिमण्डलस्य अनुमोदनानन्तरं नगरदेशनियोजननियमा-२०१४ संशोधनं क्रियते । राज्यस्य मुख्यसचिवेन संजयगुप्तेन प्रकाशितायाम् अधिसूचनायां ३० दिवसेषु एतेषु नियमानाम् प्रारूपे जनाक्षेपाः परामर्शाः च आमन्त्रिताः सन्ति। अस्मिन् संशोधने विघ्नाभिः, तलक्षेत्रानुपातैः च सम्बद्धानि आवश्यकतानि शिथिलानि भवन्ति । एषा शिथिलता आवासीय-वाणिज्यिकभवनयोः कृते प्रवर्तते। यानस्थगनस्थलं, आपणानि, विपणिपरिसराः, पर्यटन-एककाः च, यत्र होटलानि, सिनेमागृहाणि च सन्ति, भवनस्य आवश्यकताभ्यः अपि मुक्ताः भविष्यन्ति । यानस्थगनस्थलस्य कृते निर्मितक्षेत्रस्य आधारेण एतत् शिथिलीकरणं प्रदत्तं भवति। भवनानां कृते तलक्षेत्रानुपातस्य आधारेण शिथिलता भविष्यति । ऊर्ध्वाधरनिर्माणं प्रोत्साहयितुं भवनस्य ऊर्ध्वता अपि शिथिलं क्रियन्ते।





# वार्ता-संवादः

**नन्दिनी-** नमो वः। अद्यतने 'अध्येता' इत्यस्य वार्ता-कार्यक्रमे स्वागतं करोमि। नमस्ते काव्ये।

**काव्या-** नमस्ते नन्दिनि। अद्य प्रथमा वार्ता दिल्लीविमानपत्तनतः आगता अस्ति। तत्रत्याः अधिकारिणः घोषितवन्तः यत् बहुविघ्नानन्तरं वायुयानयातायातव्यवस्था पुनः कार्यान्विता अस्ति।

**नन्दिनी-** सत्यम्, एतादृशाः विघ्नाः यात्रिभ्यः महतीं पीडां जनयन्ति। इदानीम् अपरा वार्ता। तृणमूल-काङ्ग्रेस-दलस्य सांसदः कल्याण-बन्धोपाध्यायः आन्तर्जालीय-वञ्चनया वञ्चितः। सः मिथ्या- वित्तकोष-ग्राहकाभिज्ञान-द्वारा षट्पञ्चाशत्-लक्षं रूप्यकाणि हारितवान् अस्ति।

**काव्या-** अहो, एषा वञ्चना तु महती। आन्तर्जालीय-व्यवहारेषु सर्वैः सावधानैः भवितव्यम्। परन्तु प्रथमवार्तायाः विषये पुनः वदामि। किं तत् स्थाननिर्धारक-तन्त्रस्य (GPS) मायाजालम्, येन चतुःशताधिक-विमानानां यात्रा प्रभाविता जाता?

**नन्दिनी-** आम्, एषः विषयः अतीव गम्भीरः, यतः यात्रिणां सुरक्षा सर्वोपरि वर्तते। इदानीम् एका विवादास्पदा वार्ता। भारतीयजनतापक्षस्य नेतारः आरोपं कृतवन्तः यत् नेहरुः 'वन्दे मातरम्' इति राष्ट्रीयात् गीतात् दुर्गामातरम् उल्लेखयन्तः श्लोकान् धार्मिक-कारणतः अपसारितवान् अस्ति।

**काव्या-** इतिहासस्य अयम् एकः गम्भीरः आरोपः। विवादः अयं महत्त्वपूर्णः भवति।

**नन्दिनी-** सत्यम्। अद्य एतावदेव। धन्यवादाः काव्ये। श्वः नूतनाभिः वार्ताभिः सह पुनः मिलामः। नमस्कारः।

# "विनोदकणिका"

एतत् अधुना एव नूतनम् आरब्धम् अस्ति। अद्य प्रातःकाले मम भार्या अवदत्। शाकतः आरभ्य गृहस्य वस्तूनि तथा च विश्वचषकपर्यन्तः यावत् सर्वं स्त्रियः आनयन्ति। भवन्तः केवलं दूरचित्रवाणीं पश्यन्ति।

